# Vyasakritam Shivashtaka Stotram

# વ્યાસકૃતં શિવાષ્ટકસ્તોત્રમ્

## Document Information

Text title : Vyasakritam Shivashtaka Stotram

File name : vyAsakRRitaMshivAShTakastotram.itx

Category : shiva, skandapurANa, aShTaka, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | uttarakhaNDa | adhyAya 95/56-63||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# વ્યાસકૃતં શિવાષ્ટકસ્તોત્રમ્

વ્યાસ ઉવાચ ।
એકો રુદ્રો ન દ્વિતીયો યતસ્તદ્બ્રહ્મૈવૈકં નેહ નાનાસ્તિ કિઞ્ચિત્ ।
યદ્યપ્યન્યઃ કોઽપિ વા કુત્રચિદ્વા વ્યાચષ્ટાં તદ્યસ્ય શક્તિર્મદગ્રે ॥ ૧॥

યઃ ક્ષીરાબ્ધેર્મન્દરાઘાતજાતો જ્વાલામાલી કાલકૂટોઽતિભીમઃ ।
તં સોઢું વા કો પરોઽભૂન્મહેશાદ્યત્કીલાભિઃ કૃષ્ણતામાપ વિષ્ણુઃ ॥ ૨॥

યદ્બાણોઽભૂચ્છ્રીપતિર્યસ્ય યન્તા લોકેશો યત્સ્યન્દનં ભૂઃ સમસ્તા ।
વાહા વેદા યસ્ય યેનેષુપાતાદ્દગ્ધા ગ્રામાસ્ત્રૈપુરાસ્તત્સમઃ કઃ ॥ ૩॥

યં કન્દર્પો વીક્ષમાણઃ સમાનં દેવૈરન્યૈર્ભસ્મજાતઃ સ્વયં હિ ।
પૌષ્પૈર્બાણૈઃ સર્વવિશ્વૈકજેતા કો વા સ્તુત્યઃ કામજેતુસ્તતોઽન્યઃ ॥ ૪॥

યં વૈ વેદો વેદ નો નૈવ વિષ્ણુર્નો વા વેધા નો મનો નૈવ વાણી ।
તં દેવેશં માદૃશઃ કોઽલ્પમેધા યાથાત્મ્યાદ્વૈ વેત્ત્યહો વિશ્વનાથમ્ ॥ ૫॥

યસ્મિન્સર્વં યસ્તુ સર્વત્ર સર્વો યો વૈ કર્તા યોઽવિતા યોઽપહર્તા ।
નો યસ્યાદિર્યઃ સમસ્તાદિરેકો નો યસ્યાન્તો યોઽન્તકૃત્તં નતોઽસ્મિ ॥ ૬॥

યસ્યૈકાખ્યા વાજિમેધેન તુલ્યા યસ્ય નત્યા ચૈકયાલ્પેન્દ્રલક્ષ્મીઃ ।
યસ્ય સ્તુત્યા લભ્યતે સત્યલોકો યસ્યાર્ચાતો મોક્ષલક્ષ્મીરદૂરા ॥ ૭।
નાન્યં દેવં વેદ્મ્યહં શ્રીમહેશાન્નાન્યં દેવં સ્તૌમિ શમ્ભોરૃતેઽહમ્ ।
નાન્યં દેવં વા નમામિ ત્રિનેત્રાત્સત્યં સત્યં સત્યમેતન્મૃષા ન ॥ ૮॥

ઇત્થં યાવત્સ્તૌતિ શમ્ભું મહર્ષિસ્તાવન્નન્દી શામ્ભવાદ્દૃક્પ્રસાદાત્ ।
તદ્દોઃ સ્તમ્ભં ત્યક્તવાંશ્ચાબભાષે સ્માયં સ્માયં બ્રાહ્મણેભ્યો નમો વઃ ॥ ૯॥

નન્દિકેશ્વર ઉવાચ ।
ઇદં સ્તવં મહાપુણ્યં વ્યાસ તે પરિકીર્તિતમ્ ।
યઃ પઠિષ્યતિ મેધાવી તસ્ય તુષ્યતિ શઙ્કરઃ ॥ ૧૦॥

વ્યાસાષ્ટકમિદં પ્રાતઃ પઠિતવ્યં પ્રયત્નતઃ ।
દુઃસ્વપ્નપાપશમનં શિવસાન્નિધ્યકારકમ્ ॥ ૧૧॥

માતૃહા પિતૃહા વાપિ ગોઘ્નો બાલઘ્ન એવ વા ।
સુરાપી સ્વર્ણહૃદ્વાપિ નિષ્પાપો સ્યાઃ સ્તુતેર્જપાત્ ॥ ૧૨॥

ઇતિ શ્રીસ્કાદપુરાણે કાશીખણ્ડે પૂર્વાર્દ્ધે પઞ્ચનવતિતમા- ધ્યાયાન્તર્ગતં
વ્યાસકૃતં શિવાષ્ટકસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । કાશીખણ્ડ । ઉત્તરખણ્ડ ૨ । અધ્યાય ૯૫/૫૬-૬૩ ॥

skandapurANa . kAshIkhaNDa . uttarakhaNDa 2 . adhyAya 95/56-63..

Proofread by PSA Easwaran

*Vyasakritam Shivashtaka Stotram*
pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*